**संस्कृतवार्ता:**

**दिनाङ्क: 03.08.2025**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री/वाराणसी</u>**

प्रधानमन्त्री नरेन्द्र-मोदी नागरिकान् स्वदेशीय-भावनाम् अङ्गीकर्तुं स्थानीयोत्पादान् च समर्थयितुम् आहूतवान्। उत्तरप्रदेशे वाराणस्याम् आयोजिते एकस्मिन् कार्यक्रमे श्री मोदी सबलं प्रतिपादितवान् यत् वैश्विकार्थिकानिश्चितता-स्थितौ स्वदेशीय-वस्तूनां संवर्धनम् एव राष्ट्रस्य यथार्थसेवा अस्ति।

**<u>प्रधानमन्त्री/कृषकसम्माननिधि:</u>**

प्रधानमन्त्री नरेन्द्रमोदी ह्यः वाराणसीत: समस्तस्यापि देशस्य सप्तति-लक्षाधिक-नव-कोटिकाधिकेभ्य: कृषकेभ्य: कृषक-सम्मान-निधे: विंशं धनपुटकं प्रख्यापितवान्। एवं प्रकारेण कृषकाणां बैंक-लेखासु साक्षात् पञ्च-शताधिक-विंशति-सहस्र-कोटिकानि रूप्यकाणि हस्तान्तरितानि। प्रधानमन्त्री द्वि-शतोत्तर-द्वि-सहस्र-कोटि-मितानां रूप्यकाणां द्वि-पञ्चाशन्मिता: विकास-परियोजनाश्चापि शिलान्यास-पुरस्सरम् उद्घाटितवान्। सभां संबोधयन्, प्रधानमन्त्री काश्या साकं निज-सम्बन्धस्य विषयेऽपि उक्तवान्। सः उक्तवान् यत् ऑपरेशन्-सिंदूर-इत्याख्यस्य सैन्याभियानस्य सफलताया: अनन्तरं सः प्रथमवारं काशीमागतोऽस्ति। बाबा-विश्वनाथस्य कृपया भारतेन पहलगाम-आक्रमणे पीडितेभ्य: जनेभ्य: न्यायः प्रदत्तः। विपक्षस्य आलोचनां कुर्वन् प्रधानमन्त्री अवदत् यत् एतत् नवीनं भारतमस्ति। ऑपरेशन्-सिंदूर-सैन्याभियानस्य अवसरे समग्रेणापि विश्वेन आत्मनिर्भर-भारतस्य सामर्थ्यम् अवलोकितम्।

**<u>निर्वाचनायोग:</u>**

निर्वाचनायोगेन बी.एल्.ओ.-इत्येतेषां कुटीर-स्तरीय-पदाधिकारिणां पारिश्रमिकं द्विगुणीकृतम्। निर्वाचन-सूचीनां निर्माणे पुनरीक्षणे च संलग्नानां बी.एल्.ओ.-इति-कुटीर-स्तरीय-पर्यवेक्षकानामपि पारिश्रमिकं वर्धितम्। निर्वाचनायोगेन एकस्मिन् वक्तव्ये सूचितं यत् संशोधित-संरचनानुसारं बी.एल्.ओ.-कर्मिणां वार्षिकं पारिश्रमिकं षट्सहस्र-रूप्यकाणि यावत् द्विगुणीकृतम् अस्ति।

**<u>संस्कृत-साप्ताहिकी</u>**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

**<u>भारत-संयुक्तराष्ट्रसङ्घ-परियोजनाः</u>**

भारतेन 'भारत-संयुक्तराष्ट्रसङ्घस्य वैश्विक-क्षमता-निर्माण-परिकल्पना' इत्यस्य प्रकल्पस्य अन्तर्गतं चतुर्णां विकासपरियोजनानां प्रथमसमूहः प्रारब्धः, यस्य उद्देश्य: वैश्विक-दक्षिण-देशानां सतत-विकास-लक्ष्याणां पूर्तये समर्थनं वर्तते। अस्मिन् सन्दर्भे विदेश-मन्त्रालयस्य सचिवेन तन्मय-लालेन परियोजना: आधिकारिकतया प्रारब्धाः।

**ऋतुः**

अद्य उपहिमालयीय-पश्चिमबंगाल-सिक्किम-मेघालय-अरुणाचल-प्रदेशेषु मूसलाधार-वृष्टिः भविष्यति इति भारतीयर्तु-विज्ञान-विभागस्य अनुमानः अस्ति। अद्य तमिलनाडु-केरल-बिहार-प्रदेशेषु प्रचण्डवृष्टिः भविष्यति इति संभाव्यते। अपि च, झारखण्ड-मध्यप्रदेश-पूर्वोत्तर-राजस्थान-उत्तराखण्ड-पूर्वोत्तरीय-क्षेत्रेषु घनासार-वृष्टेः संभावना अस्ति।

**क्रिकेट्**

भारत-इंग्लैण्डयोः मध्ये अनुवर्तमानायां पञ्च-स्पर्धात्मिकायाम् एंडरसन-तेंदुलकर-चषक-निकष-क्रिकेट्-क्रीडा-मालिकायां लंदने द-ओवल्-इत्यत्र पञ्चमस्य अन्तिमस्य च द्वन्द्वस्य चतुर्थे दिने आतिथेयम् इंग्लैण्ड-दलं भारतं विरुध्य स्वीय-द्वितीय-पाल्याः आरम्भं करिष्यति। इयं स्पर्धा भारतीय-कालानुसारि दिने सार्ध-त्रिवादने आरप्स्यते। भारतेन इंग्लैण्डस्य पुरतः विजयाय चतुस्सप्तत्यधिक-त्रिशत-धावनाङ्कानां विजयलक्ष्यं स्थापितमस्ति।

**।।इति वार्ताः।।**